सुखदा आयुर्वेद-ग्रंथमाला

प्रथमं पुष्पम्

॥ श्री ॥

श्रीमत्सायणमाधवाचार्यप्रणीतम्

सर्वदर्शनसङ्ग्रहान्तर्गतम्

रसेश्वरदर्शनम्

[मूलसंस्कृतसंहिता संशोधितपाठभेदश्लोकसूचीसंवलिता]

परिष्कर्ता सम्पादकश्च

डॉ. नीलेश जोशी

प्रथमावृत्तिः २०१७, खिस्ताब्दम्

॥ग्रन्थ एव गुरुः॥

eBook Publication Pvt. Ltd.®



सुखदा आयुर्वेद-ग्रंथमाला

प्रथमं पुष्पम्

|| श्री ||

श्रीमत्सायणमाधवाचार्यप्रणीतम्

सर्वदर्शनसङ्ग्रहान्तर्गतम्

रसेश्वरदर्शनम्

[मूलसंस्कृतसंहिता संशोधितपाठभेदश्लोकसूचीसंवलिता]

परिष्कर्ता सम्पादकश्च

डॉ. नीलेश जोशी

शास्त्री (व्याकरणम्), एम.ए. (संस्कृतम्), पी.एच.डी.

वरिष्ठभाषाशास्त्रज्ञः, सं.वि.अ.विभागः, भा.प्रौ.सं. मुंबई

Senior Linguist Dpt. Of Computer Science and Engineering, IIT Bombay, Mumbai

॥ग्रन्थ एव गुरुः॥

eBook Publication Pvt. Ltd.®

प्रथमावृत्तिः २०१७, ख्रिस्ताब्दम्

रसेश्वरदर्शनम्

मूलसंस्कृतसंहिता संशोधितपाठभेदश्लोकसूचीसंवलिता

परिष्कर्ता संपादकश्च : डॉ. नीलेश जोशी

प्रथमावृत्तिः- माघ-कृष्ण-द्वितीया, मकरसंक्रान्तिः |

१४ जानेवारी २०१७

प्रकाशक:

eBook Publication Pvt. Ltd.®

4/47, उदय को. हौ. सोसायटी,

आरे रोड, गोरेगाव पश्चिम,

मुंबई, महाराष्ट्र, भारत, ४०००६२

Telephone: +91 7038164022

Email: publicationebook@gmail.com

Website: https://archive.org/details/@ebook_publcation

© सर्वेऽधिकाराः सम्पादकेन सुरक्षिताः |

eBook Publication Pvt. Ltd.®

eBook Publication Pvt. Ltd.®

eBook Terms & Conditions

1. This eBook* may be

a. Distributed without modification or sale.

b. Copied for personal and educational use.

c. Printed for personal and educational use.

2. This eBook* may NOT be

a. Sold individually or as part of package.

b. Modified in any way.

c. Reversed-engineered.

This eBook* and all its content including images are Copyright © 2017 Dr. Nilesh Joshi- All rights reserved.

***eBook refers to this PDF and any of its content including pages and images in either electronic or printed form.**

अनुक्रमणिका

....................4

संक्षेपाभिज्ञानम् 10

प्रस्तावना 12

|| रसेश्वरदर्शनम् || 31

(शैवसंप्रदायस्य चतुर्थदर्शनम्)....................31

१.पारदमहत्त्वम्....................31

खण्डः १ 31

खण्डः २ 31

खण्डः ३ 32

खण्डः ४ 32

खण्डः ५ 32

खण्डः ६ 33

खण्डः ७ 33

खण्डः ८ 33

खण्डः ९ 34

खण्डः १० 34

२.जीवन्मुक्तः....35
खण्डः ११....35
खण्डः १२....35
खण्डः १३....35
खण्डः १४....35
खण्डः १५....36
खण्डः १६....36
३.मूर्च्छितमृतबद्ध-पारदविधाः....36
खण्डः १७....36
१.मूर्च्छितपारदः....36
खण्डः १८....37
२.मृतपारदः....37
खण्डः १९....37
३.बद्धपारदः....37
४.पारदस्य अष्टादश-संस्काराः....37
खण्डः २०....37
खण्डः २१....38

खण्डः २२ 38

खण्डः २३ 38

५.देहवेधः 39

खण्डः २४ 39

खण्डः २५ 39

खण्डः २६ 39

६.मुक्तौ देहवेधस्यावश्यकता 40

खण्डः २७ 40

खण्डः २८ 40

खण्डः २९ 40

खण्डः ३० 41

७.जीवन्मुक्तेरुपपन्नता 41

खण्डः ३१ 41

खण्डः ३२ 41

खण्डः ३३ 42

खण्डः ३४ 42

खण्डः ३५ 42

खण्डः ३६ 42

खण्डः ३७ 43

खण्डः ३८ 43

खण्डः ३९ 44

खण्डः ४० 44

८.रसमाहात्म्यं रसलिङ्गपूजा 44

खण्डः ४१ 44

खण्डः ४२ 45

खण्डः ४३ 45

खण्डः ४४ 45

९.रसनिन्दायां दोषः 46

खण्डः ४५ 46

१०. दिव्यदेहेन ब्रह्मत्वप्राप्तिः 46

खण्डः ४६ 46

खण्डः ४७ 47

खण्डः ४८ 47

११. रसब्रह्मणोः साम्यत्वम् 47

खण्डः ४९..47

खण्डः ५०..47

खण्डः ५१..48

ग्रन्थान्तर्गत-उद्धृत-श्लोकसूची..49

संदर्भग्रंथसूची..54

संक्षेपाभिज्ञानम्

च.चि. = चरकसंहिता-चिकित्सास्थानम्

च.सू. = चरकसंहिता-सूत्रस्थानम्

धा.पा. = धातुपाठः पाणिनीयः

र.अ. = रसार्णवम्

र.त. = रसतरङ्गिणी

र.चि. = रसेन्द्रचिन्तामणि

र.मं. = रसमञ्जरी

र.रत्न.स. = रसरत्नसमुच्चयः

र.रत्ना. = रसरत्नाकरः

रसे.सं. = रसेन्द्रसंग्रहः

र.हृ. = रसहृदयतन्त्रम्

रा.नि. = राजनिघण्टु

सु.सू. = सुश्रुतसंहिता-सूत्रस्थानम्

प्रस्तावना

सर्वदर्शनाभिमतं जीवन्मुक्तिदायकम् |

पारदादिवेदनीयं नमाम्यहं रसेश्वरम् ||

अत्र **सर्वदर्शनाभिमतम्** नाम सर्वदर्शनकारैर्मान्यता प्राप्तेत्यर्थः | तत्रापि सर्वदर्शनकाराणां विषये विचार्यमाणे सति जीवन्मुक्तिर्मोक्षो वा नामका संकल्पना विभिन्नप्रकारेण प्रस्तूयते तत्तद्दर्शनेषु | तानि विभिन्नानि भारतीयदर्शनानि तद्यथा- **(१) मीमांसादर्शनम् (२) न्यायदर्शनम् (३) वैशेषिकदर्शनम् (४) सांख्यदर्शनम् (५) योगदर्शनम् (६) वेदान्तदर्शनम् |** एतानि प्रमुखानि षड्दर्शनानि | षड्दर्शनानीमान्येव आस्तिकदर्शनानि वैदिकदर्शनानि वा सुविख्यातानि | ततोऽपि **(१) चार्वाकदर्शनम् (२) बौद्धदर्शनम् (३) जैनदर्शन**मित्येतानि त्रीणि नास्तिकदर्शनान्यवैदिकदर्शनानि वा ज्ञेयानि | नवभ्यो दर्शनेभ्योऽपि सायण-माधवाचार्यवर्यैः **सर्वदर्शनसङ्ग्रहो** नामकग्रन्थे **(१) रामानुजदर्शनम् (२) पूर्णप्रज्ञदर्शनम् (३) पाशुपतदर्शनम् (४) शैवदर्शनम् (५) प्रत्यभिज्ञादर्शनम् (६) रसेश्वरदर्शनम् (७) पाणिनिदर्शन**मिति सप्तदर्शनानि समाविष्टानि | (Abhyankar, 1924)[1] तेषु रसशास्त्रस्य प्रतिपादकं पारदमाहात्म्यनिरूपकं रसेश्वरदर्शनं व्याख्यास्याम इति शेषः | तदा रसेश्वरदर्शने-

---

[1] Abhyankar, V. S. (1924). सर्वदर्शनसंग्रह, दर्शनाङ्कुरव्याख्या. Mumbai: Nirnaya Sagar Press, Mumbai, *see- ग्रंथानुक्रम.*

अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव संगिरन्ते | एवं कथनान्**ननु प्रकारान्तरेणापि जीवन्मुक्तियुक्तौ नेयं वाचोयुक्तियुक्तिमतीति** आक्षेपस्य **षट्स्वपि दर्शनेषु देहपातानन्तरं मुक्तेरुक्ततया तत्र विश्वासानुपपत्त्या निर्विचिकित्सप्रवृत्तेरनुपपत्ते**रिति समाधानादपि सर्वदर्शनेषु संसारचक्रेण त्रस्तस्य जीवस्य मुक्तिकारकोपायविचारमन्थनम् | ततोऽत्र जीवन्मुक्तिर्न केवलं शैवसंप्रदायमान्या अपि तु वेदान्तस्यार्थात् केवलाद्वैतशांकरपरंपरागतस्य विद्यारण्याचार्यस्य (१२९६-१३८६) जीवन्मुक्तिमधिकृत्य सुगभीरविवरणपरको **जीवन्मुक्तिविवेको** नामकस्य ग्रन्थस्य ग्रथनात् | (जोशी ल.)[2]

अथ सर्वदर्शनसङ्ग्रहग्रन्थस्य रसेश्वरदर्शनस्य प्रारंभिकं पदं "**अपरे माहेश्वरा**" इत्यनेन निर्देशेन सायणमाधवाचार्यस्याभिप्रायविशेषो ज्ञेयस्तद्यथा-

अपरे माहेश्वरा नाम के तु माहेश्वरसंप्रदायेष्वेव रसेश्वरदर्शस्य पूर्वोक्तत्रिविधशैवदर्शनेभ्य व्यतिरिक्ताः रसेश्वरदर्शनकारा इति | रसेश्वरदर्शनपूर्वोक्तत्रिविधशैवदर्शनानि तानि यथा- १) **पाशुपतदर्शनम्, २) शैवदर्शनम्, ३) प्रत्यभिज्ञादर्शनम्**; इति पूर्वदर्शनकारैः प्रतिपादितमार्गेभ्यो

[2] जोशी, ल. (एन. डी.). केवलाद्वैतवाद. मध्ये ल. जोशी, मराठी विश्वकोश, खण्ड ४.

भिन्नजीवन्मुक्तिसाधनोपायस्य प्रतिपादकत्वादन्ये माहेश्वरा **अपरे माहेश्वराः** इति |

तत्रापि दर्शनाङ्कुरव्याख्यागतेन **पूर्वेषामिवैषामपि संमत**[3] इति पदेन जीवब्रह्मैक्यप्रतिपादनमेवाद्वैतवादस्य मुख्यसिद्धान्तोऽपि (जोशी ल.) शैवदर्शनेषु **रसेश्वरदर्शनम्** अन्तिमदर्शनत्वात् **प्रत्यभिज्ञादर्शनम्** रसेश्वरदर्शनस्य प्राक् सर्वदर्शनसंग्रहग्रंथे प्रतिपाद्यते तथा चापि प्रत्यभिज्ञादर्शनमेव तु शैवसंप्रदायस्याव्दैतवादिनी शाखा एव मन्यते | यतस्तन्त्रागमस्यानुयायिना वसुगुप्तेन (इ. स. ८२५) शैवमतमव्दैतवादस्वरूपेण प्रतिपादितम् | (कुलकर्णी) अतः प्रस्तुतेन पदेन रसवादिनो माहेश्वरा जीवब्रह्मैक्यं मन्यन्ते यच्छैवसंप्रदायाविरुद्धत्वात्प्रत्यभिज्ञावादिभिः सिद्धपूर्वत्वात् |

अत एव **अपि** पदेन जीवब्रह्मणोरद्वैतं स्वीकृत्यापि **पिण्डस्थैर्ये** नाम जीवात्मनो निवासस्थानभूतस्य देहस्य स्थिरतायै **पारद** नाम्नाभिख्यातो **रससिद्धान्तो** वर्ण्यत इति तात्पर्यार्थः |

अधुना रसेश्वरदर्शनग्रंथस्य संपादितविभिन्नावृत्तिविषयकं परिशीलनं प्रस्तूयते तद्यथा-

रसेश्वरदर्शनस्योपलब्धसंहिता -

---

[3] Abhyankar, V. S. (1924). *सर्वदर्शनसंग्रह, दर्शनाङ्कुरव्याख्या.* Mumbai: Nirnaya Sagar Press, Mumbai, pg.२०२

ननु रसेश्वरदर्शनमिति नाम्ना स्वतंत्ररूपेण ग्रंथो नोपलभयतेपि तु सर्वदर्शनसंग्रहग्रंथस्यैवायं भागः | अत एव सर्वदर्शनसंग्रहस्योपलब्धप्रकाशितावृत्तयस्तद्यथा-

- SARASWATI, M. (1906). Sarva Darshan Sangrah, . Pune : ANAND ASHRAM MUDRANALAY.
- Abhyankar, V. S. (1924). सर्वदर्शनसंग्रह, दर्शनाङ्कुरव्याख्या. Mumbai: Nirnaya Sagar Press, Mumbai.
- SINGH, P. U. (1962). Sarva Darshan Sangrah. Mumbai: Khemaraj Shrikrushnadas, SHRI VETESHWER Press Mumbai.
- कंगले, र. प. (१९८५). सर्वदर्शनसंग्रह, सटीप मराठी भाषांतर. मुंबई: महाराष्ट्र राज्य साहित्य संस्कृती मंडळ, मुंबई .

तथापि रसेश्वरदर्शनान्तर्गतोद्धृतरसशास्त्रस्य मूलभूतग्रंथास्तेऽपि यथा-

- बापट, क. व. (१९०५). रसरत्नसमुच्चयः . पुणे: आनंदाश्रम, पुणे.
- Aacharya Yadav, T. G. (1927). रसहृदयतन्त्रम्, मुग्धावबोधिनी समाख्यासमुल्लसितम्. Lahore: Motilaal Banarasi Das.
- Krishnadas, K. (1966). रसरत्नाकर, . Mumbai: Kshemraj Krishnadas.
- Prafulla chandra Ray, H. c. (1985). रसार्णवम्. Calcutta: The Asiatic Society.

समुपलब्धपाठभेदास्तद्विषयकविमर्शश्च-

रसेश्वरदर्शनं रससिद्धान्तस्य प्रतिपादकं प्रतिष्ठापकं चात मूलरसशास्त्रग्रन्थगतपाठेभ्यः केचिद्भिन्नाः पाठाः रसेश्वरदर्शने समुल्लिखितास्तेषां विमर्शो

१) पारदो गदितो यस्मात्परार्थं साधकोत्तमैः ।। र.अ.१.३५ ।।

यस्मात्परार्थं-

पाठभेददृष्ट्या महात्त्वपूर्णोऽयं पाठः | अत्र **यस्मात् परार्थम्** चेति पदद्वयं वर्तते | तयोः प्रथमपदस्य **यस्मात्** इत्यस्य विषये परामर्शोवश्यं करणीयम् | यतः सर्वदर्शनसंग्रहग्रंथस्याभ्यंकरशास्त्रि-विरचितदर्शनांकुरसंवलिता आवृत्तिः[4], आनंदाश्रमप्रकाशित-आवृत्तिः[5], पं.उदयसिंघ-महोदयस्य खेमराज-आवृत्तिः[6], तथा च महाराष्ट्रराज्यसाहित्यसंस्कृतिमंडलप्रकाशिता-आवृत्तिः[7] एतासु चतुरावृत्तिषु **यस्मात् परार्थं** इत्येवं पाठः समुपलब्धः|

---

[4] (Abhyankar, 1924),ibid,pg.202

[5] (SARASWATI, 1906), Sarva Darshan Sangrah,Pune : ANAND ASHRAM MUDRANALAY, pg.80

[6] **Invalid source specified.**, Sarva Darshan Sangrah. Mumbai: Khemaraj Shrikrushnadas, SHRI VETESHWER Press Mumbai, pg.160

[7] (कंगले, १९८५), सर्वदर्शनसंग्रह, सटीप मराठी भाषांतर. मुंबई: महाराष्ट्र राज्य साहित्य संस्कृती मंडळ

इदानीं तु संदेहकारणं तद्यथा रसेश्वरदर्शने तद्यदयं श्लोको **रसार्णवेऽपि** इति समुल्लिखितत्वात् गोविंदाचार्यविरचितं रसार्णवम् नामकं रसशास्त्रग्रंथगतः इति स्पष्टम् | अपि तु श्लोकोऽयं रसार्णवग्रंथेन्विष्यमाणे सति तत्र यत्पाठो दृश्यते तद्यथा-

पारदो गदितो यश्च परार्थं साधकोत्तमैः ॥ र.अ.१.३५ ॥

उपर्युक्तः **यस्मात्** स्थाने **यश्च** इति पाठः प्रफुल्लचंद्र-राय-महोदयेन संपादितायामावृत्त्यां समुपलब्धः|[8], संस्करणेस्मिन् ५ हस्तलिखितानामाधारेण पाठसिद्धिः | हस्तलिखितान्येतानि काश्मीर-बिकानेर-डेक्कन-मैसूरादिस्थानेभ्यः संकल्येयमावृत्तिः संपादिता खलु |[9]; अत एवेयं चिकित्सितसंशोधितावृत्तित्वादत्यन्त-प्रामाणिका स्मृता |

तस्मादनन्तरमियमेवावृत्तिः प्रमाणीकृत्य जर्मनीदेशस्थ-गोटेंगननगरस्थ-जॉर्ज-ऑगस्ट-विद्यापीठस्य GRETIL e-libray[10] नामक-online ग्रंथालयस्य,तथा च Sanskritworld[11] इत्यस्य Ayurved, alchemy विभागस्य, Rasavidyā, Computer-based analysis of Indian alchemy[12] इति उपक्रमे यथावत् स्वीकृता तथा चायं पाठोपि | तथाप्यस्याः

---

[8] (Prafulla chandra Ray, 1985), ibid, pg.6

[9] (Prafulla chandra Ray, 1985), ibid, *see.*preface

[10] http://gretil.sub.uni-goettingen.de/gretil.html

[11] https://www.sanskritworld.in/index/detailview/book_id/rasarnava

[12] http://www.sanskritreader.de/rasavidya/index.php?contents=texte&lng=en

जर्मनभाषागतावृत्तिरपि समुपलब्धा ।[13]. [टिप्पणी: उपर्युल्लिखितसर्वसंस्थानां संकेतस्थलानि निर्दिष्टानि तलगतटीपासु]

अनेन स्पष्टमभवद्यदायुर्वेदस्याभ्यासकस्य दृष्ट्या **यस्मात् परार्थं** इत्ययं पाठः सदोषः | यतो मूलरसार्णवग्रन्थे तु **यश्च परार्थं** इति अत् एव संदेहजनकस्थितिः | अस्य संदेहनिवारणाय व्याकरणचर्चा नात्र विषयप्रस्तावात् प्रस्तूयते केवलं पाठनिर्देशेनालम् | अपरं च

२) सुप्तोऽयं मत्समो देवि मम प्रत्यङ्गसंभवः ।

मम देहरसो यस्माद्रसस्तेनायमुच्यते ॥ इति ।र.अ.१.३६ ।।

सुप्तोऽयम्-

अत्र सुप्तः + अयम् इति द्वे पदे स्तः | तत्रापि सुप्त इति पदं पारदस्य निर्देशकम् | पूर्ववदत्रापि चतुरावृत्तिषु **सुप्तोऽयम्** इत्येवं पाठः समुपलब्धः|

इदानीं सुप्त इति **ञिष्वपँ शये (धा.पा.०२.६३)** अदादिगणस्थधातोः क्त-प्रत्ययान्तरूपम् | अस्यार्थ यो निद्रिस्त-अवस्थायां वर्तते इति स सुप्तः |

किंतु आयुर्वेदे हे पद विशेषणभूतस्य पदस्यास्य प्रयोगस्तद्यथा दृश्यते चरकसंहितायाम् -

---

[13] http://www.sanskritreader.de/rasavidya/rasavidya.php?lng=de

हृदयं कफहृद्रोगे सुप्तं स्तिमितभारिकम्।

तन्द्रारुचिपरीतस्य भवत्यश्मावृतं यथा।।च.सू.१७.३५।।

अत्र प्रयोजितं **सुप्तपदं मन्दक्रियम्** इत्यर्थमभिधत्ते । तथापि तत्रैव चिकित्सास्थाने मंदवेदनावान्, दुःखम् चेत्यर्थे-

निपीडितोन्नते स्तब्धे सुप्ते तत्पार्श्वपीडनात्।

तत्रैव पिण्डिते शूले सम्पक्वं गुल्ममादिशेत्।।च.चि.५.४३।।

अत्र **सुप्ते** पदस्यार्थनिर्णय आयुर्वेददीपिकाव्याख्याकारेण चक्रपाणिदत्तमहोदयेन **मंदवेदनम्** इति कृतः ।[14] अपि च ज्ञानहीनः निरिन्द्रियो जडो वेति सुश्रुतेन सूत्रस्थाने प्रयोजितः-

वायावुच्छ्रितकठिनसुप्तमांसे.....।।सु.सू.१२.१०।।

अत्र **सुप्त**पदस्य टीकाकारडल्हणेन **अचेतनम्** इत्यर्थः स्वीकृतः ।[15]

सारांशतः, अनेन स्पष्टं भवति यत् **सुप्त** शब्दस्य **पारद** इत्यर्थे आयुर्वेदग्रन्थेषु नोपलभ्यते तथा चापि केषु च कोषेष्वपि पारदस्य पर्यायित्वेन न निर्दिश्यते अत एव केवलं सर्वदर्शनसंग्रहग्रन्थगत-रसेश्वरदर्शनस्यैवोपलब्धिरियम् ।

[14] **सुप्ते इति मन्दवेदने इत्यर्थः।** (चरक, 2010), ibid,च.चि.५.४३

[15] **सुप्तमचेतनम्। नाडीति व्रणविशेषः।** (सुश्रुत, 2010), ibid,सु.सू.१२.१०

अपि च गोविंदाचार्यविरचित-**रसार्णवम्** नामके रसशास्त्रे पाठोयमुल्लिखितः |

सूतोऽयं मत्समो देवि मम प्रत्यङ्गसम्भवः ॥ र.अ.१.३६ ॥

उपर्युक्तस्थाने **सुप्तोऽयम्** स्थाने **सूतोऽयं** इत्ययं पाठः प्रफुल्लचंद्ररायमहोदयसंपादितायामावृत्त्यां निर्दिष्टः |[16], तत्रापि तलटीपासु **सुप्तोऽयम्** इति पाठभेदः १)**स. २)द. ३)स.** इत्येतेषु त्रिषु हस्तलिखितेषु स्वीकृतः इति सुस्पष्टरीत्या समुल्लिखितः |[17]

किंतु **रसार्णव**ग्रंथे **सूतोऽयं** इत्यंयं पाठः स्वीकृतः | यतो रसशास्त्रस्य सर्वग्रंथेषु पारदस्य यानि कानि नामधेयानि निर्दिष्टानि सन्ति तेषु सूतोभिधानमेकम् |

३) नानावर्णो -

पारदस्य **मूर्च्छितत्वे** प्रतिपादने प्रस्तुतः श्लोको रसेश्वरदर्शनकारैरुद्धृतः-

नानावर्णो भवेत्सूतो विहाय घनचापलम् ।

लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि ॥रसेश्वरदर्शनम्॥

---

[16] (Prafulla chandra Ray, 1985), ibid, pg.6

[17] स.द.सं. reads **सुप्तोऽयम्,** (Prafulla chandra Ray, 1985), ibid, pg.6

श्लोकेस्मिन् **नानावर्णः** इत्यस्य पदस्य काराणादेवायं केवलं रसेश्वरदर्शनस्य भागो भवति | पाठोयं पूर्ववच्चतुरावृत्तिषु समुल्लिखितः | अपि तु रसशास्त्रस्य ग्रंथेषु **रसार्णवे** ग्रंथे प्रस्तुतः श्लोको यथावत्समुपल्ब्धः तद्यथा-

नागवर्णो भवेत्सूतो विहाय घनचापलम् ।

लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि ॥ र.अ.११.११९ ||

अत्र **नानावर्णः** पदस्थाने **नागवर्णः** इति पाठः | प्रस्तुतेस्यार्थस्तु नागवर्णक इति | नागवर्णः नाम नारङ्गवर्णः | नारङ्गवर्णयुक्तं नारङ्गफलं चरकसंहितायां दृश्यते यथा-

दुर्जरं वातशमनं नागरङ्गफलं गुरु || च.सू.२७.१५६||

तदा **नाग** इति शब्दोऽयमेको खनिजः सीसमित्यर्थे रसरत्नसमुच्चय-ग्रंथे-

काष्ठौषध्यो नागे नागो वङ्गेऽथ वङ्गमपि शुल्बे ।र.रत्न.स.१.४१ ||

इत्यत्र पारदो गंधकसीसयुक्तो पारदयोगो यो **नागसुंदर** इति नाम्ना प्रसिद्धः | नावाने ओळखला जातो. **रसरत्नसमुच्चय**-ग्रंथे अतिसारचिकित्सायां कथ्यते-

नागभस्मरसव्योमगन्धैरर्धपलोन्मितैः ।

कुर्वीत कज्जलीं श्लक्ष्णां प्रक्षिपेत्तदन्तरम् || र.रत्न.स.१६.३६ ||

इत्यादिप्रकारेण सविस्तरं वर्णितम् |

अतो रसेश्वरदर्शनकारैः स्वीकृतो **नानावर्णः** इत्ययं पाठो रसशास्त्रस्य ग्रंथेषु नोपलभ्यते तथापि **नागवर्ण** इत्ययं पाठस्तूपलब्धो रसशास्त्रे च मान्यतां प्राप्तश्च |

४) अक्षतश्च लघुद्रावी तेजस्वी निर्मलो गुरुः ।

स्फोटनं पुनरावृत्तौ बद्धसूतस्य लक्षणम् ॥ रसेश्वरदर्शनम् ॥

अक्षतश्च-

अत्र पारदस्य तृतीयस्वरूपं बद्धत्वं विवेचनप्रसङ्गे रसेश्वरदर्शने **अक्षतश्च इति** पदं प्रयुज्यते | पाठोऽयं पूर्ववच्चतुरावृत्तिषु समुल्लिखितः| अपि त्वायुर्वेदग्रंथेभ्योयं श्लोकः सायणमाधवाचार्यैरुद्धृतः स श्लोको रसमञ्जरी- नामक-ग्रंथे दृश्यते तद्यथा-

अक्षयी च लघुर्द्रावी तेजस्वी निर्मलो गुरुः ।

स्फुटनं पुनरावृत्तिर्बद्धसूतस्य लक्षणम् ॥ र.मं.२.५१ ॥

अत्र **अक्षयी** इति पाठो दृश्यतेस्यार्थोक्षयगुणप्राप्तो अर्थात् अग्निसंस्कारे सति यः क्षयं नेतीति तदर्थमेवानुयाति **अक्षत** इत्यपि पदेन तथापि स एव पाठो निघण्टुरत्नाकरसंमतः |

इत्थं केवलं मुख्यपाठभेदविमर्शोनुष्ठीयते | अनेन पाठभेददर्शनेन नवागतस्य संभाव्यसंदेहस्य निवारणबुद्ध्या प्रपञ्चितमिदम् |

अनुपलब्धसंदर्भश्लोकाः-

अत्र केवलं रससिद्धान्त-साकारसिद्धि-नामकग्रन्थद्वयस्यानुपलब्धित्वाद्रेसेश्वरदर्शने उद्धृतश्लोकसंदर्भा न दृश्यन्ते | ते अनुपलब्धसंदर्भश्लोकाः यथा-

सर्वप्रथमखंडक्रमाङ्के (१०)दशमे अधोलिखितश्लोकः उद्धृतोपि तु तस्य मूलस्रोतसः उल्लेखो न प्रफुल्लचंद्ररायमहोदयैः कृतो रसेश्वरदर्शनकारैरपि वा | अर्थदृष्ट्या रसेश्वरसिद्धान्तदृष्ट्या चातीव महत्त्वपूर्णो श्लोकोऽयं-

अभ्रकस्तव बीजं तु मम बीजं तु पारदः ।

अनयोर्मेलनं देवि मृत्युदारिद्रयनाशनम् ॥ इति ।[18]

खंड-१२-१३-१४ एतेषु **रसेश्वरसिद्धान्त**ग्रंथगतश्लोका उद्धृताः-

देवाः केचिन् महेशाद्या दैत्याः काव्यपुरःसराः ।

मुनयो वालखिल्याद्या नृपाः सोमेश्वरादयः ॥

गोविन्दभगवत्पादाचार्यो गोविन्दनायकः ।

चर्वटिः कपिलो व्यालिः कापालि: कन्दलायनः ।।

---

[18] Dr. Ray P.C. History of Hindu Chemistry, pg.lxxii अत्रापि समुपल्लिखितोऽयं श्लोकः |

एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि।

तनुं रसमयीं प्राप्य तदात्मककथाचणाः ॥ इति ।

खंड-१९-

अक्षतश्च लघुद्रावी तेजस्वी निर्मलो गुरुः ।

स्फोटनं पुनरावृत्तौ बद्धसूतस्य लक्षणम् ॥ इति ।

उपर्युक्तश्लोकगतं केवलं **अक्षतश्च** पाठभेदं वर्जयित्वायं श्लोको **रसमंजरी**नामकग्रंथे यथावत्समुपलब्धः |

ततः खंड- ३३-३४ अन्तर्गताः श्लोकाः **रसेश्वरसिद्धान्त**ग्रंथादुद्धृताः-

रसाङ्कमेयमार्गोक्तो जीवमोक्षोऽन्यथा तु न ।

प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु ॥

ज्ञातृज्ञेयमिदं विद्धि सर्वतन्त्रेषु संमतम् ।

नाजीवञ्ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवनम् ॥ इति ।

ततः खंड-३६-

साकारसिद्धि नामकग्रंथस्थश्लोका ये रसेश्वरदर्शने उद्धृता अपि तु मूलग्रन्थस्यानुपलब्धित्वात्प्रामाण्यं न सिध्यते-

सच्चिन्नित्यनिजाचिन्त्यपूर्णानन्दकविग्रहम् ।।

नृपञ्चास्यमहं वन्दे श्रीविष्णुस्वामिसंमतम् ॥ इति ।

खंड-४४-

काश्यादिसर्वलिङ्गेभ्यो रसलिङ्गार्चनाच्छिवः ।

प्राप्यते येन तल्लिङ्गं भोगारोग्यामृतप्रदम् ॥ इति ।

खंड-४५-

प्रमादाद्रसनिन्दायाः श्रुतावेनं स्मरेत्सुधीः ।

द्राक्त्यजेन्निन्दकं नित्यं निन्दया पूरिताशुभम् ।।

खंड ५० मध्ये-

यः स्यात्प्रावरणाविमोचनधियां साध्यः प्रकृत्या पुनः

संपन्नः सह तेन दीव्यति परं वैश्वानरे जाग्रति ।

ज्ञातो यद्यपरं न वेदयति च स्वस्मात्स्वयं द्योतते

यो ब्रह्मेव स दैन्यसंसृतिभयात्पायादसौ पारदः ॥ इति ।

इत्थं रसेश्वरदर्शने उद्धृतानां १२ श्लोकानां मूलसंदर्भग्रन्था अनुपलब्धाः सन्ति |

रसेश्वरदर्शनस्य विषयविभागाः-

रसेश्वरदर्शनस्य संहिता पठनाध्ययनसौकर्यार्थं सहसा खंडशः विभज्यते तदा ५१ खण्डाः भवन्ति | तेषां विषयविभागा यथा-

१)पारदमहत्त्वम् २) जीवन्मुक्तः ३) मूर्च्छित-मृत-बद्ध-पारदवर्णनम् ४) अष्टादश संस्काराः पारदस्य ५) देहवेधविधानम् ६) मुक्तौ देहवेधस्य निरतिशयता ७) जीवन्मुक्तेरुपपन्नता ८) रसमाहात्म्यं रसलिङ्गपूजा च ९) रसनिंदादोषविधानम् १०) दिव्यदेहेन ब्रह्मत्वप्राप्तिकथनम् ११) रसब्रह्मसाम्यनिरूपणम्

रसेश्वरदर्शनस्य विषयवस्तु-

रसेश्वरदर्शनमिदं शैवदर्शनस्यान्तिमं दर्शनं मन्यन्ते | दर्शनेस्मिन् ‘रस’ शब्दस्यास्यार्थः पारदः इति | पारदसंस्कारनिमित्तभूतविभिन्नप्रकियाभिः दिव्यदेहप्राप्तिः विवेच्या | पारदो जीवात्मानं संसारस्य परं पारं नयतीति | अतः संसारस्य परं पारं ददातीति पारदोभिधीयते | **तदुक्तम् -**

संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः ॥ इति ।र.रत्ना.३.१.६॥

शरीरे स्थिरतां प्राप्ते सति जीवन्मुक्तिः संभाव्या | अतः पिण्डस्थैर्यस्योपायभूतोऽयं पारदो निरूपितः | जीवो यदि जीवन्मुक्तो भवेत्तर्हि एव स ईश्वरस्वरूपो भवितुमर्हति | रसेश्वरदर्शनसंमता जीवन्मुक्तिर्नाम अजरामरत्वं पिण्डस्य देहस्य वा | जराव्याधिमृत्युभ्यो मुक्तो देहः | तत्संपादनार्थं पारदः प्रयोजनीयः इति |

पारद इवाभ्रकस्यापि महत्त्वं प्रगीतम् | पारदो महेश्वरस्य बीजनिष्पन्नस्तु गौरीबीजानिष्पन्नोभ्रकः स्मृतः तद्यथा-

अभ्रकस्तव बीजं तु मम बीजं तु पारदः ।

अपि च

सूतोऽयं मत्समो देवि मम प्रत्यङ्गसंभवः ।

मम देहरसो यस्माद्रसस्तेनायमुच्यते ॥ र.अ.१.३६ ।।

अतो द्वयोरचितयोगेन दिव्यदेहस्य प्राप्तिः |

पारदस्य सिद्धिविधौ स्वेदन-मर्दन-मूर्च्छन-स्थापन-पातनादि-अष्टादश-संस्काराः विधीयन्ते | तथा च तेनैव विविधाः खेचरादयः सिद्धयोऽपि प्राप्यन्ते | अन्ततः रसस्य ब्रह्मणा साम्यत्वं प्रतिपाद्य रसो वै ब्रह्म इत्यादिश्रुतिप्रामाण्यात् | इत्येव रस एव परब्रह्म निदर्शनाद्दर्शनस्य परं ध्येयम् | अत उच्यते -

तदित्यं भवदैन्यदुःखभरतरणोपायो रस एवेति सिद्धम् ॥ रसेश्वरदर्शनम् ॥

रसेश्वरदर्शनमेक एव ग्रंथो यो विद्यापीठस्तरीयमहाविद्यालयेषु तथा चायुर्वेदमहाविद्यालयेष्वेवमुभयस्तरे अध्ययनीयस्ततो बहुमूल्यवदिदं रसेश्वरदर्शनम् | अत एवात्र केवलं

विषयप्रवेशपूर्वकपठनाध्ययनप्रवृत्तिपरकप्रेरणानुकूलव्यापारात्मकोयं प्रपञ्चः
|

डॉ.नीलेश जोशी

मकरसंक्रान्तिः, माघ-कृष्ण-द्वितीया

१४ जानेवारी २०१७

=============

|| श्री ||

श्रीमत्सायणमाधवाचार्यप्रणीतम्

सर्वदर्शनसङ्ग्रहान्तर्गतम्

रसेश्वरदर्शनम्

[मूलसंस्कृतसंहिता संशोधितपाठभेदश्लोकसूचीसंवलिता]

eBook Publication Pvt. Ltd.®

|| रसेश्वरदर्शनम् ||

(शैवसंप्रदायस्य चतुर्थदर्शनम्)

१.पारदमहत्त्वम्

खण्डः १

अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव संगिरन्ते ।

==================

खण्डः २

रसस्य पारदत्वं संसारपरपारप्रापणहेतुत्वेन ।

तदुक्तम् -

संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः ॥ इति ।र.रत्ना.३.१.६॥[19]

===============

[19] (Krishnadas, 1966), रसरत्नाकर, . Mumbai: Kshemraj Krishnadas.

खण्डः ३

रसार्णवेऽपि -

पारदो गदितो यस्मात्परार्थं साधकोत्तमैः ।। र.अ.१.३५ ।।

================

खण्डः ४

सुप्तोऽयं मत्समो देवि मम प्रत्यङ्गसंभवः ।

मम देहरसो यस्माद्रसस्तेनायमुच्यते ॥ इति ।र.अ.१.३६ ।।

================

खण्डः ५

(आक्षेपभाष्यम्)

ननु प्रकारान्तरेणापि जीवन्मुक्तियुक्तौ नेयं वाचोयुक्तियुक्तिमतीति

(समाधानभाष्यम्)

चेत्, न, षट्स्वपि दर्शनेषु देहपातानन्तरं मुक्तेरुक्ततया तत्र विश्वासानुपपत्त्या निर्विचिकित्सप्रवृत्तेरनुपपत्तेः ।

==================

खण्डः ६

तदप्युक्तं तत्रैव

षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने। र.अ.१.१२

करामलकवत्सापि प्रत्यक्षा नोपलभ्यते ।। र.अ.१.१३

तस्मात्तं रक्षयेत्पिण्डं रसैश्चैव रसायनैः ॥ र.अ.१.११

==================

खण्डः ७

गोविन्दभगवत्पादाचार्यैरपि

इति धनशरीरभोगान्मत्वानित्यान् सदैव यतनीयम् ।

मुक्तौ सा च ज्ञानात्तच्चाभ्यासात्स च स्थिरे देहे ॥ र.हृ.१.१० ॥

==================

खण्डः ८

(आक्षेपभाष्यम्)

ननु विनश्वरतया दृश्यमानस्य देहस्य कथं नित्यत्वमवसीयत इति चेत्,

(समाधानभाष्यम्)

मैवं मंस्थाः । षाट्कौशिकस्य शरीरस्यानित्यत्वेऽपि रसाभ्रकपदाभिलप्यहरगौरीसृष्टिजातस्य नित्यत्वोपपत्तेः ।

================

खण्डः ९

तथा च रसहृदये -

ये चात्यक्तशरीरा हरगौरीसृष्टिजां तनुं प्राप्ताः ।

मुक्तास्ते रससिद्धा मन्त्रगणो किंकरो येषाम् ॥ र.हृ.१.७ ॥

================

खण्डः १०

तस्माज्जीवन्मुक्ति समोहमानेन योगिना प्रथमं दिव्यतनुविधेया। हरगौरीसृष्टिसंयोगजनितत्वं च रसस्य हरजत्वेनाभ्रकस्य गौरीसंभवत्वेन तत्तदात्मकत्वमुक्तम् -

अभ्रकस्तव बीजं तु मम बीजं तु पारदः ।

अनयोर्मेलनं देवि मृत्युदारिद्रयनाशनम् ॥ इति ।[20]

================

[20] Dr. Ray P.C. History of Hindu Chemistry, pg.lxxii

२.जीवन्मुक्तः

खण्डः ११

अत्यल्पमिदमुच्यते। देवदैत्यमुनिमानवादिषु बहवो रससामर्थ्यादिव्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते रसेश्वरसिद्धान्ते

================

खण्डः १२

देवाः केचिन् महेशाद्या दैत्याः काव्यपुरःसराः ।

मुनयो वालखिल्याद्या नृपाः सोमेश्वरादयः ॥

खण्डः १३

गोविन्दभगवत्पादाचार्यो गोविन्दनायकः ।

चर्वटिः कपिलो व्यालिः कापालि: कन्दलायनः ।।

================

खण्डः १४

एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि।

तनुं रसमयीं प्राप्य तदात्मककथाचणाः ॥ इति ।

================

खण्डः १५

अयमेवार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः -

कर्मयोगेण देवेशि प्राप्यते पिण्डधारणम् ।

रसश्च पवनश्चेति कर्मयोगो द्विधा स्मृतः ॥ र.अ.१.१८ ॥

================

खण्डः १६

मूर्च्छितो हरति व्याधीन्मृतो जीवयति स्वयम् ।

बद्धः खेचरतां कुर्याद्रसो वायुश्च भैरवि ॥ इति ।र.अ.१.१९॥

================

३.मूर्च्छितमृतबद्ध-पारदविधाः

खण्डः १७

१.मूर्च्छितपारदः

मूर्च्छितस्वरूपमुक्तम् -

नानावर्णो भवेत्सूतो विहाय घनचापलम् ।

लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि ॥

================

खण्डः १८

२.मृतपारदः

आर्द्रत्वं च घनत्वं च तेजो गौरवचापलम् ।

यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥ र.अ.११.२००॥

================

खण्डः १९

३.बद्धपारदः

अन्यत्र बद्धस्वरूपमप्यभ्यधायि-

अक्षतश्च लघुद्रावी तेजस्वी निर्मलो गुरुः ।

स्फोटनं पुनरावृत्तौ बद्धसूतस्य लक्षणम् ॥ इति ।

================

४.पारदस्य अष्टादश-संस्काराः

खण्डः २०

ननु हरगौरीसृष्टिसिद्धौ पिण्डस्थैर्यमास्थातुं पार्यते, तत्सिद्धिरेव कथमिति चेत्, न, अष्टादशसंस्कारवशात्तदुपपत्तेः ।

================

खण्डः २१

तदुक्तमाचार्यैः

तस्य प्रसाधनविधौ सुधिया प्रतिकर्मनिर्मलाः प्रथमम् ।

अष्टादश संस्कारा विज्ञातव्याः प्रयत्नेन ॥ र.हृ.१.३४ ।

================

खण्डः २२

ते च संस्कारा निरूपिताः

स्वेदनमर्दनमूर्छनस्थापनपातननिरोधनियमाश्च ।

दीपनगमनग्रासप्रमाणमथ जारणविधानम् ॥ र.हृ.२.१ ।

गर्भद्रुतिबाह्यद्रुतिक्षारणसंरागसारणाश्चैव ।

क्रामणवेधौ भक्षणमष्टादशधेति रसकर्म ॥ र.हृ.२.२ ।

================

खण्डः २३

तत्प्रपञ्चस्तु गोविन्दभगवत्पादाचार्यसर्वज्ञरामेश्वरभट्टारकप्रभृतिभिः प्राचीनैराचार्यनिरूपित इति ग्रन्थभूयस्त्वभयादुदास्यते ।

================

५.देहवेधः

खण्डः २४

न च रसशास्त्रं धातुवादार्थमेवेति मन्तव्यम्, देहवेधद्वारा मुक्तेरेव परमप्रयोजनत्वात् ।

================

खण्डः २५

तदुक्तं रसार्णवे-

लोहवेधस्त्वया देव यदर्थमुपवर्णितः ।

तं देहवेधमाचक्ष्व येन स्यात्खेचरी गतिः ।। र.अ.१८.१ ||

================

खण्डः २६

यथा लोहे तथा देहे कर्तव्यः सूतकः सता ।

समानं कुरुते देवि प्रत्ययं देहलोहयोः || र.अ.१७.१६५ ||

पूर्वं लोहे परीक्षेत पश्चाद्देहे प्रयोजयेत् ॥ र.अ.१७.१६६ ॥

================

६.मुक्तौ देहवेधस्यावश्यकता

खण्डः २७

(आक्षेपभाष्यम्)

ननु सच्चिदानन्दात्मकपरतत्त्वस्फुरणादेव मुक्तिसिद्धौ किमनेन दिव्यदेहसंपादनप्रयासेनेति चेत्,

(समाधानभाष्यम्)

तदेतद्वार्तम् । अवार्तशरीरालाभे तद्वार्ताया अयोगात् ।

================

खण्डः २८

तदुक्तं रसहृदये-

गलितानल्पविकल्पः सर्वाध्वविवक्षितश्चिदानन्दः ।

स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्य ॥ (र.हृ.१.२०) इति ।

================

खण्डः २९

यज्जरया जर्जरितं कासश्वासादिदुःखविशदं च ।

योग्यं यन्न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम् ॥ (र.हृ.१.२९) इति ।

================

खण्डः ३०

बालः षोडशवर्षो विषयरसास्वादलम्पटः परतः ।

यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिम् ॥ र.रत्न.स.१.५७ ।

================

७.जीवन्मुक्तेरुपपन्नता

खण्डः ३१

(आक्षेपभाष्यम्)

ननु जीवत्वं नाम संसारित्वम्, तद्विपरीतं मुक्तत्वम्, तथा च परस्परविरुद्धयोः कथमेकायतनत्वमुपपन्नमिति चेत्,

(समाधानभाष्यम्)

तदनुपपन्नम्, विकल्पानुपपत्तेः।

================

खण्डः ३२

मुक्तिस्तावत्सर्वतीर्थकरसंमता, सा किं ज्ञेयपदे निविशते न वा। चरमे शशविषाणकल्पा स्यात् । प्रथमे न जीवनं वर्जनीयम्, अजीवतो ज्ञातृत्वानुपपत्तेः ।

================

खण्डः ३३

तदुक्तं रसेश्वरसिद्धान्ते -

रसाङ्कमेयमार्गोक्तो जीवमोक्षोऽन्यथा तु न ।

================

खण्डः ३४

प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु ॥

ज्ञातृज्ञेयमिदं विद्धि सर्वतन्त्रेषु संमतम् ।

नाजीवञ्ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवनम् ॥ इति ।

================

खण्डः ३५

न चेदमदृष्टचरमिति मन्तव्यम्, विष्णुस्वामिमतानुसारिभिर्नृपञ्चास्य शरीरस्य नित्यत्वोपपादनात् ।

================

खण्डः ३६

तदुक्तं साकारसिद्धौ-

सच्चिन्नित्यनिजाचिन्त्यपूर्णानन्दकविग्रहम् ।।

नृपञ्चास्यमहं वन्दे श्रीविष्णुस्वामिसंमतम् ॥ इति ।

================

खण्डः ३७

(आक्षेपभाष्यम्)

नन्वेतत्सावयवं रूपवदवभासमानं नृकण्ठीरवाङ्गं सदिति न संगच्छत इत्यादिनाक्षेपपुरःसरं,

================

खण्डः ३८

(समाधानभाष्यम्)

सनकादिप्रत्यक्षं, 'सहस्रशीर्षा पुरुषः' (श्वे.३.१४) इत्यादिश्रुति-, 'तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाधुदायुधम् (भाग. १०.३.९) इत्यादिपुराण-लक्षणेन प्रमाणत्रयेण सिद्धं नृपञ्चाननाङ्गं कथमसत्स्यादिति सदादीनि विशेषणानि गर्भश्रीकान्तमिश्रविष्णुस्वामिचरणपरिणतान्तःकरणः प्रतिपादितानि ।

तस्मादस्मदिष्टदेहनित्यत्वमत्यन्तादृष्टं न भवतीति पुरुषार्थकामुकैः पुरुषैरेष्टव्यम् ।

================

खण्डः ३९

अत एवोक्तम् -

आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् ।

श्रेयः परं किमन्यच्छरीरमजरामरं विहायकम् ।। र.रत्न.स.१.७४ ।

================

खण्डः ४०

अजरामरीकरणसमर्थश्च रसेन्द्र एव ।

तदाह

एकोऽसौ रसराजः शरीरमजरामरं कुरुते ॥ र.रत्न.स.१.४३ ।

================

८.रसमाहात्म्यं रसलिङ्गपूजा

खण्डः ४१

किं वर्ण्यते रसस्य माहात्म्यम् । दर्शनस्पर्शनादिनापि महत्फलं भवति ।

================

खण्डः ४२

तदुक्तं रसार्णवे-

दर्शनात्स्पर्शनात्तस्य भक्षणात्स्मरणादपि ।

पूजनाद्रसदानाच्च दृश्यते षड्विधं फलम् ॥ र.अ.१.३७ ॥

================

खण्डः ४३

केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित् ।

तानि दृष्ट्वा तु यत्पुण्यं तत्पुण्यं रसदर्शनात् ॥ र.अ.१.३८ इत्यादिना।

================

खण्डः ४४

अन्यत्रापि -

काश्यादिसर्वलिङ्गेभ्यो रसलिङ्गार्चनाच्छिवः ।

प्राप्यते येन तल्लिङ्गं भोगारोग्यामृतप्रदम् ॥ इति ।

९.रसनिन्दायां दोषः

खण्डः ४५

रसनिन्दायाः प्रत्यवायोऽपि दर्शितः

प्रमादाद्रसनिन्दायाः श्रुतावेनं स्मरेत्सुधीः ।

द्राक्त्यजेन्निन्दकं नित्यं निन्दया पूरिताशुभम् ।। इति ।

================

१०. दिव्यदेहेन ब्रह्मत्वप्राप्तिः

खण्डः ४६

तस्मादस्मदुक्तया रीत्या दिव्यं देहं संपाद्य योगाभ्यासवशात्परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवति ।

तदा

भ्रूयुगमध्यगतं यच्छिखिविद्युत्सूर्यवज्जगद्भासि ।

केषांचित्पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः ॥(र.हृ.१.२१)

================

खण्डः ४७

परमानन्दैकरसं परमं ज्योतिःस्वभावमविकल्पम् ।

विगलितसकलक्लेशं ज्ञेयं शान्तं स्वसंवेद्यम् ॥(र.हृ.१.२२)

================

खण्डः ४८

तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत्पश्यन् ।

उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥ (र.हृ.१.२३)

================

११. रसब्रह्मणोः साम्यत्वम्

खण्डः ४९

श्रुतिश्च 'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति (तै. २.७.१)' इति । तदित्थं भवदैन्यदुःखभरतरणोपायो रस एवेति सिद्धम् ।

================

खण्डः ५०

तथा च रसस्य परब्रह्मणा साम्यमिति प्रतिपादकः श्लोकः --

यः स्यात्प्रावरणाविमोचनधियां साध्यः प्रकृत्या पुनः

संपन्नः सह तेन दीव्यति परं वैश्वानरे जाग्रति ।

ज्ञातो यद्यपरं न वेदयति च स्वस्मात्स्वयं द्योतते

यो ब्रह्मेव स दैन्यसंसृतिभयात्पायादसौ पारदः ॥ इति ।

================

खण्डः ५१

इति श्रीमत्सायणमाधवीये सर्वदर्शनसंग्रहे रसेश्वरदर्शनम् ।

================

ग्रन्थान्तर्गत-उद्धृत-श्लोकसूची

अक्षतश्च लघुद्रावी तेजस्वी निर्मलो गुरुः । खंड १९

अनयोर्मेलनं देवि मृत्युदारिद्रयनाशनम् ॥ इति ।खंड १०

अभ्रकस्तव बीजं तु मम बीजं तु पारदः । खंड १०

अष्टादश संस्कारा विज्ञातव्याः प्रयत्नेन ॥ र.हृ.१.३४ ।

आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् । र.रत्न.स.१.५४ ।

आर्द्रत्वं च घनत्वं च तेजो गौरवचापलम् । र.अ.११.२००॥

इति धनशरीरभोगान्मत्वानित्यान् सदैव यतनीयम् । र.हृ.१.१० ॥

उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥ (र.हृ.१.२३)

एकोऽसौ रसराजः शरीरमजरामरं कुरुते ॥ र.रत्न.स.१.४३ ।

एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि। खंड १४

करामलकवत्सापि प्रत्यक्षा नोपलभ्यते ।। र.अ.१.१३

कर्मयोगेण देवेशि प्राप्यते पिण्डधारणम् ।र.अ.१.१८ ॥

काश्यादिसर्वलिङ्गेभ्यो रसलिङ्गार्चनाच्छिवः । खंड ४४

केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित् । र.अ.१.३८

केषांचित्पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः ॥(र.हृ.१.२१)

क्रामणवेधौ भक्षणमष्टादशधेति रसकर्म ॥ र.हृ.२.२ ।

गर्भद्रुतिबाह्यद्रुतिक्षारणसंरागसारणाश्चैव । र.हृ.२.२ ।

गलितानल्पविकल्पः सर्वाध्वविवक्षितश्चिदानन्दः । (र.हृ.१.२०)

गोविन्दभगवत्पादाचार्यो गोविन्दनायकः । खंड १३

चर्वटिः कपिलो व्यालिः कापालि: कन्दलायनः ।।खंड १३

ज्ञातृज्ञेयमिदं विद्धि सर्वतन्त्रेषु संमतम् । खंड ३४

ज्ञातो यद्यपरं न वेदयति च स्वस्मात्स्वयं द्योतते । खंड ५०

तं देहवेधमाचक्ष्व येन स्यात्खेचरी गतिः ।। र.अ.१८.१ ।।

तनुं रसमयीं प्राप्य तदात्मककथाचणाः ॥ इति ।खंड १४

तस्मात्तं रक्षयेत्पिण्डं रसैश्चैव रसायनैः ॥ र.अ.१.११

तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत्पश्यन् । (र.हृ.१.२३)

तस्य प्रसाधनविधौ सुधिया प्रतिकर्मनिर्मलाः प्रथमम् । र.हृ.१.३४ ।

तानि दृष्ट्वा तु यत्पुण्यं तत्पुण्यं रसदर्शनात् ॥ र.अ.१.३८ इत्यादिना।

दर्शनात्स्पर्शनात्तस्य भक्षणात्स्मरणादपि । र.अ.१.३७ ॥

दीपनगमनग्रासप्रमाणमथ जारणविधानम् ॥ र.हृ.२.१ ।

देवाः केचिन् महेशाद्या दैत्याः काव्यपुरःसराः । खंड १२

द्राक्त्यजेन्निन्दकं नित्यं निन्दया पूरिताशुभम् ।। इति ।खंड ४५

नाजीवञ्ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवनम् ॥ इति ।खंड ३४

नानावर्णो भवेत्सूतो विहाय घनचापलम् । खंड १७

नृपञ्चास्यमहं वन्दे श्रीविष्णुस्वामिसंमतम् ॥ इति । खंड ३६

परमानन्दैकरसं परमं ज्योतिःस्वभावमविकल्पम् । (र.हृ.१.२२)

पारदो गदितो यस्मात्परार्थं साधकोत्तमैः ।। र.अ.१.३५ ।।

पूजनाद्रसदानाच्च दृश्यते षड्विधं फलम् ॥ र.अ.१.३७ ॥

पूर्वं लोहे परीक्षेत पश्चाद्देहे प्रयोजयेत् ॥ र.अ.१७.१६६ ॥

प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु ॥खंड ३४

प्रमादाद्रसनिन्दायाः श्रुतावेनं स्मरेत्सुधीः । खंड ४५

प्राप्यते येन तल्लिङ्गं भोगारोग्यामृतप्रदम् ॥ इति । खंड ४४

बद्धः खेचरतां कुर्याद्रसो वायुश्च भैरवि ॥ इति ।र.अ.१.१९॥

बाल: षोडशवर्षो विषयरसास्वादलम्पट: परतः ।र.रत्न.स.१.५७ ।

भ्रूयुगमध्यगतं यच्छिखिविद्युत्सूर्यवज्जगद्भासि । (र.हृ.१.२१)

मम देहरसो यस्माद्रसस्तेनायमुच्यते ॥ इति ।र.अ.१.३६ ।।

मुक्तास्ते रससिद्धा मन्त्रगणो किंकरो येषाम् ॥ र.हृ.१.७ ॥

मुक्तौ सा च ज्ञानात्तच्चाभ्यासात्स च स्थिरे देहे ॥ र.हृ.१.१० ॥

मुनयो वालखिल्याद्या नृपाः सोमेश्वरादयः ॥ खंड १२

मूर्च्छितो हरति व्याधीन्मृतो जीवयति स्वयम् । र.अ.१.१९॥

यः स्यात्प्रावरणाविमोचनधियां साध्यः प्रकृत्या पुनः ।खंड ५०

यज्जरया जर्जरितं कासश्वासादिदुःखविशदं च । (र.हृ.१.२९) इति ।

यथा लोहे तथा देहे कर्तव्यः सूतकः सता । र.अ.१७.१६५ ।।

यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥ र.अ.११.२००॥

यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिम् ॥ र.रत्न.स.१.५७ ।

ये चात्यक्तशरीरा हरगौरीसृष्टिजां तनुं प्राप्ताः । र.हृ.१.७ ॥

यो ब्रह्मेव स दैन्यसंसृतिभयात्पायादसौ पारदः ॥ इति । खंड ५०

योग्यं यन्न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम् ॥ (र.हृ.१.२९) इति ।

रसश्च पवनश्चेति कर्मयोगो द्विविधा स्मृतः ॥ र.अ.१.१८ ॥

रसाङ्कमेयमार्गोक्तो जीवमोक्षोऽन्यथा तु न । खंड ३३

लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि ॥ खंड १७

लोहवेधस्त्वया देव यदर्थमुपवर्णितः । र.अ.१८.१ ।।

विगलितसकलक्लेशं ज्ञेयं शान्तं स्वसंवेद्यम् ॥(र.हृ.१.२२)

श्रेयः परं किमन्यच्छरीरमजरामरं विहायकम् ।। र.रत्न.स.१.५४ ।

षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने। र.अ.१.१२

संपन्नः सह तेन दीव्यति परं वैश्वानरे जाग्रति । खंड ५०

संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः ॥ इति ।र.रत्ना.३.१.६॥

सच्चिन्नित्यनिजाचिन्त्यपूर्णानन्दकविग्रहम् ।। खंड ३६

समानं कुरुते देवि प्रत्ययं देहलोहयोः ।। र.अ.१७.१६५ ।।

सुप्तोऽयं मत्समो देवि मम प्रत्यङ्गसंभवः । र.अ.१.३६ ।।

स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्य ॥ (र.हृ.१.२०) इति ।

स्फोटनं पुनरावृत्तौ बद्धसूतस्य लक्षणम् ॥ इति । खंड १९

स्वेदनमर्दनमूर्छनस्थापनपातननिरोधनियमाश्च । र.हृ.२.१ ।

संदर्भग्रंथसूची

Aacharya Yadav, T. G. (1927). *रसहृदयतन्त्रम्, मुग्धावबोधिनी समाख्यासमुल्लसितम्.* Lahore: Motilaal Banarasi Das.

Abhyankar, V. S. (1924). *सर्वदर्शनसंग्रह, दर्शनाङ्कुरव्याख्या.* Mumbai: Nirnaya Sagar Press, Mumbai.

Amara-simha. (1990). *Amara-kosha (with the commentary of Maheshvara).* Pune: H.A. Bhave for Varadaa Books.

Apate, V. S. (1890). *Apate Sanskrit dictionary.* Pune: Department of Sanskrit Studies, University of Hyderabad, Hyderabad. http://sanskrit.uohyd.ac.in/cgi-bin/scl/SHMT/options1.cgi?word=%E0%A4%AA%E0%A4%B0&outencoding=DEV पासून प्राप्त

Atreya, B., & अनुवादक, ज. आ. (2003). *योगवासिष्ठदर्शनम्.* Mid□alasaiksa: āūthōla, Mid□alasaiksa, Yū. Ke. : S□rī Guru Vālmīka Sabhā.

Bhat□t□ācārya, T. T. ((1962).). *Vachaspatyam: (a comprehensive Sanskrit dictionary). .* Benares: Benares: Chowkhamba Sanskrit Series Office.

Devendra Nātha Pāṇḍeya, S. (2004). *Chāndogya Brāhaṇaṁ.* Navajīvana Pablikeśansa.

Feuerstein, G. (2003). *The Deeper Dimension of Yoga.* Boston: Shambala Publications, Boston, MA.

Gonda, J. (1963). *The Indian Mantra, Oriens, Vol. 16,.* The Netherlands: BRILL.

Hindi Wordnet, CFILT, IITBombay. (२००८). हिंदी शब्दबंध: http://www.cfilt.iitb.ac.in/wordnet/webswn/wn.php पासून प्राप्त

Juergensmeyer, M., & Roof, W. C. (2011). *Encyclopedia of Global Religion.* SAGE Publications, ISBN 978-1-4522-6656-5.

Krishnadas, K. (1966). *रसरत्नाकर, .* Mumbai: Kshemraj Krishnadas.

Kulkarni, M. (2007). *Sanskrit Wordnet*. Sanskrit Wordnet: http://www.cfilt.iitb.ac.in/sanskritwordnet पासून प्राप्त

Lochtefeld, J. (2001). *The Illustrated Encyclopedia of Hinduism, Volume 2,.* New York: The Rosen Publishing Group, .

MONIER-WILLIAMS, M. (1899). *A Sanskrit-English dictionary: Etymologically and philologically arranged with special reference to Cognate indo-european languages.* Oxford: The Clarendon Press.

Prafulla chandra Ray, H. c. (1985). *रसार्णवम्.* Calcutta: The Asiatic Society.

Ray, P. C. (एन. डी.). *History of Indian Chemistry Vol. II .* Colkatta: Asiatic Society.

SARASWATI, M. (1906). *Sarva Darshan Sangrah, .* Pune : ANAND ASHRAM MUDRANALAY.

Satpute, D. A. (एन. डी.). *Rasaratna Samuchchaya, with English translation.* Chaukhamba Sanskrit Pratishthan.

Sharma, R. (2002). *The aṣṭādhyāyī of pāṇini vol.01 & 2.* New Delhi: Munshilal Manoharlal Publishers PVT.LTD. post box 5715.

SINGH, P. U. (1962). *Sarva Darshan Sangrah.* Mumbai: Khemaraj Shrikrushnadas, SHRI VETESHWER Press Mumbai.

Vasu, V., & Vasu, H. (1808-1814 Saka era, (1866-)). *Sabdakalpadruma.* Calcutta: Calcutta.

Yadav, G. (2018). *"Abortion (Hinduism)", Hinduism and Tribal Religions, Encyclopedia of Indian Religions.* Netherlands,: Springer Netherlands,.

आगाशे, क. (1912). *वेदव्यासप्रणीतमहाभारतांतर्गता श्रीमद्भगवद्गीता : श्रीमधुसुदनसरस्वतीविरचितया गुढार्थदीपिकाख्यया व्याख्यया, तथा श्रीधरस्वामिविरचितसुबोधिन्याख्या व्याख्यया समेता.* पुणे: आनंदाश्रममुद्रणालय.

कंगले, र. प. (१९८५). *सर्वदर्शनसंग्रह, सटीप मराठी भाषांतर.* मुंबई: महाराष्ट्र राज्य साहित्य संस्कृती मंडळ, मुंबई .

कुलकर्णी, अ. र. (एन. डी.). शैव संप्रदाय. मध्ये त. जोशी, *मराठी विश्वकोश.*

कुलकर्णी, अ. र. (एन. डी.). सांख्यकारिका . मध्ये ल. जोशी, *मराठी विश्वकोश खंड १९ .* मुंबई: महाराष्ट्र राज्य मराठी विश्वकोश निर्मिती मंडळ, मुंबई .

चरक, म. (2010). *चरकसंहिता, श्रीचक्रपाणिदत्तविरचितया आयुर्वेददीपिकाव्याख्यया सहिता.* e-Caraka Samhita: http://niimh.nic.in/ebooks/ecaraka/ पासून प्राप्त

जोग, प. द. (१९९१). *वेदांत परिभाषा लघुकोश.* पुणे: अरविंद जोग, पुणे.

जोशी, ल. (एन. डी.). केवलाद्वैतवाद. मध्ये ल. जोशी, *मराठी विश्वकोश, खण्ड ४.*

जोशी, ल. (एन. डी.). पूर्वमीमांसा. मध्ये ल. जोशी, *मराठी विश्वकोश , खंड ९.* मुंबई.

जोशी, ल. (एन. डी.). योगदर्शन . मध्ये ल. जोशी, *मराठी विश्वकोश, खंड १४.* मुंबई.

जोशी, ल. (एन. डी.). *वैशेषिक दर्शन :, मराठी विश्वकोश, खंड १७.* मुंबई.

दीक्षित, श. ह. (एन. डी.). वेदान्त. मध्ये ल. जोशी, *मराठी विश्वकोश, खंड १४.* मुंबई.

पटवर्धन, श. अ. (एन. डी.). रसायन . मध्ये ल. जोशी, *मराठी विश्वकोश, खंड १४.* मुंबई.

पाण्डेय, प. (२००१). *महाकविकालिदासविरचितं कुमारसंभवम्.* वाराणसी : चौखम्बा विद्याभवन.

बापट, क. व. (१९०५). *रसरत्नसमुच्चयः .* पुणे: आनंदाश्रम, पुणे.

बाहादुर, र. (1961). *शब्दकल्पद्रुमः, वरदाप्रसाद-वसुना तदनुजेन हरिचरण-वसुना च अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः.* वाराणसी: चौखम्बा संस्कृत सीरीज आफिस.

भावमिश्र. (2012). *भावप्रकाशनिघण्टु.* e-nighantu: http://niimh.nic.in/ebooks/e-Nighantu/bhavaprakashanighantu/?mod=read&h=pArada पासून प्राप्त

मिश्र, आ. (१९५६). *सांख्यतत्त्वकौमुदी प्रभा.* प्रयाग: सत्यप्रकाश मंदिर, प्रयाग.

मिश्र, ड. (२०१०). *अष्टाध्यायीसूत्रपाठ.* दिल्ली: मोतीलाल बनारसीदास.

वेणीमाधवशास्त्री जोशी, न. ह. (१९६८). *आयुर्वेदीय शब्दकोश, संस्कृत-संस्कृत-मराठी, द्‌वितीय खंड, (प -ह).* मुंबई: महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ, मुंबई.

वेणीमाधवशास्त्री जोशी, न. ह. (१९६८). *आयुर्वेदीय शब्दकोश, संस्कृत-संस्कृत-मराठी, प्रथम खंड, (अ -न).* मुंबई: महाराष्ट्र राज्य साहित्य आणि संस्कृती मंडळ, मुंबई.

श्रीनरहरिपण्डित. (2012). *राजनिघण्टु.* e-nighantu: http://niimh.nic.in/ebooks/e-Nighantu/rajanighantu/?mod=read&h=pArada पासून प्राप्त

साळुंखे, आ. ह. (एन. डी.). मंत्र. मध्ये *मराठी विश्वकोश, खंड .* मुंबई: महाराष्ट्र राज्य मराठी विश्वकोश निर्मिती मंडळ, मुंबई.

सुश्रुत. (2010). *सुश्रुतसंहिता, श्रीडल्हणाचार्यविरचितया निबन्धसङ्ग्रहाख्यव्याख्यया निदानस्थानस्य श्रीगयदासाचार्यविरचितया न्यायचन्द्रिकाख्यपञ्जिकाव्याख्यया च समुल्लसिता.* e-sushruta samhita: http://niimh.nic.in/ebooks/esushruta/ पासून प्राप्त

सोमदेव. (एन. डी.). *रसेन्द्रचूडामणि.* Gottengon: University of Göttingen, Germany .



eBook Publication Pvt. Ltd.®

Free Download, Borrow, and Streaming

eBook Publication Pvt. Ltd.

प्रकाशनानि

व्याकरणम्

- पाणिनीयं लिङ्गानुशासनम्
- शान्तनवाचार्यप्रणीतः फिटसूत्रपाठः
- तिङन्तरूपावलिः, प्रथमः भागः (भ्वादिगणः) तः दशमः भागः (चुरादिगणः).. [१०ग्रन्थाः]
- पाणिनीयशिक्षा
- आपिशलशिक्षा
- ऋग्वेदप्रातिशाख्यम्

उपनिषद्ग्रन्थाः

- अमृतनादोपनिषद्
- आरुणिकोपनिषद्
- कलिसन्तरणोपनिषद्
- कृष्णोपनिषद्
- गर्भोपनिषद्
- जाबाल्युपनिषद्
- बह्वृचोपनिषद्
- ब्रह्मबिन्दूपनिषद्
- वासुदेवोपनिषद्
- सावित्र्युपनिषद्

आयुर्वेदग्रन्थाः

- रसेश्वरदर्शन, मूळ संस्कृत संहिता, शब्दार्थ आणि मराठी भाषांतर
- रसतरङ्गिणी, मूळ संस्कृत संहिता, शब्दार्थ आणि मराठी भाषांतर

काव्यशास्त्रग्रन्थाः

- काव्यालंकार, प्रथम परिच्छेद, मूळ संस्कृत संहिता, मराठी भाषांतर, पदार्थ व विवेचक टीपांसह

Email: publicationebook@gmail.com

Website: https://archive.org/details/@ebook_publcation